घ) **द्वयम्** आश्रित्य टीका कार्या – $\frac{1}{2}\times 2$

तक्षशिला, सारनाथः, लुम्बिनिग्रामः, कुसिनारा।

ङ) भारतवर्षस्य ऐतिहासिकभूगोलविषयकतथ्यादिसमन्वितम् आदियुगीयं जीवनीमूलकं किंचिद् ग्रन्थद्वयम् उल्लिख्यताम्। पौराणिकेषु चैनिकेषु च आकरेषु भारतवर्षस्य विविधानि नामानि यथा उपलभ्यन्ते तथा आलोच्यताम्। 2+3

च) आदिमध्ययुगे उत्तरभारतस्य दक्षिणभारतस्य च राजनैतिकप्राशसनिकव्यवस्था आलोचनीया।

छ) अशोकाभिलेखानामैतिहासिकभूगोलमाश्रित्य निबन्धो रचनीयः।



# Master of Arts Examination, 2022

(2nd Year, 4th Semester)

## SANSKRIT

## Course – XIX/E

**[Physical and Historical Geography of Ancient India]**

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु **पञ्च** प्रश्नाः सुरगिरा देवनागर्या लिप्या समाधेयाः। 1×5=5

क) ललितविस्तरानुसारं जम्बूद्वीपस्य आयतनं विव्रियताम्।

ख) वराहमिहिरेण भारतवर्षस्य आकृतिः केन वस्तुना उपमीयते?

ग) महावग्गग्रन्थे दक्षिणजनपदस्य अवस्थानं कुत्र निर्दिश्यते?

घ) श्रावस्ती नगरी जैनाकरेषु केन नामान्तरेण उच्यते?

ङ) षोडशमहाजनपदेषु मगधं विहाय अन्यत् किञ्चिद् द्वयम् उल्लिख्यताम्।

च) आफ़गानिस्ताने अवस्थितयोः द्वयोः अशोकीयाभिलेखप्राप्तिक्षेत्रयोः नामनी लिख्येताम्।

२। अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः। 5×5=25

क) षोडशमहाजनपदानाम् आद्यतम उल्लेखः कुत्र प्राप्यते? महाजनपदरूपेण मगधस्य उत्थानम् आश्रित्य समासत आलोच्यताम्। 1+4

ख) आर्यावर्तं मध्यदेशं चाश्रित्य आलोचना कार्या।

ग) भारतवर्षस्य नवभेदानां भौगोलिकपरिचया यथासंभवं देयाः।